श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

ओं नमो भगवते वासुदेवाय

महर्षि वेदव्यासप्रणीतं श्रीमद्भागवतमहापुराणम्

# ॥ पञ्चमस्कन्धे तृतीयोऽध्यायः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

ओं नमो भगवते वासुदेवाय

# श्रीमद्भागवतमहापुराणम्

# ॥ पञ्चमस्कन्धे तृतीयोऽध्यायः ॥

श्रीशुक उवाच
नाभिरपत्यकामोऽप्रजया मेरुदेव्या भगवन्तं
यज्ञपुरुषमवहितात्मायजत ॥ 1 ॥

तस्य ह वाव श्रद्धया विशुद्धभावेन यजतः
प्रवर्ग्येषु प्रचरत्सु द्रव्यदेशकालमन्त्रर्त्विग् -
दक्षिणाविधानयोगोपपत्त्या दुरधिगमोऽपि भगवान्
भागवतवात्सल्यतया सुप्रतीक आत्मानमपराजितं
निजजनाभिप्रेतार्थविधित्सया गृहीतहृदयो
हृदयङ्गमं मनोनयनानन्दनावयवाभिरा -
ममाविश्चकार ॥ 2 ॥

अथ ह तमाविष्कृतभुजयुगलद्वयं हिरण्मयं
पुरुषविशेषं कपिशकौशेयाम्बरधरमुरसि
विलसच्छ्रीवत्सललामं दरवरवनरुहवनमालाच्छूर्य -
मृतमणिगदादिभिरुपलक्षितं स्फुटकिरणप्रवरमुकुट -
कुण्डलकटककटिसूत्रहारकेयूरनूपुराद्यङ्गभूषण -
विभूषितमृत्विक्सदस्यगृहपतयोऽधना
इवोत्तमधनमुपलभ्य सबहुमानमर्हणेनावन -
तशीर्षाण उपतस्थुः ॥ 3 ॥

ऋत्विज ऊचुः
अर्हसि मुहुरर्हत्तमार्हणमस्माकमनुपथानां नमो
नम इत्येतावत्सदुपशिक्षितं कोऽर्हति पुमान् प्रकृति -
गुणव्यतिकरमतिरनीश ईश्वरस्य परस्य प्रकृतिपुरुषयो -
रर्वाक्तनाभिर्नामरूपाकृतिभी रूपनिरूपणम् ॥ **4** ॥

सकलजननिकायवृजिननिरसनशिवतमप्रवर -
गुणगणैकदेशकथनादृते ॥ **5** ॥

परिजनानुरागविरचितशबलसंशब्दसलिलसित -
किसलयतुलसिकादूर्वाङ्कुरैरपि सम्भृतया
सपर्यया किल परम परितुष्यसि ॥ **6** ॥

अथानयापि न भवत इज्ययोरुभारभरया समुचित -
मर्थमिहोपलभामहे ॥ **7** ॥

आत्मनि एवानुसवनमञ्जसाव्यतिरेकेण बोभूयमा -
नाशेषपुरुषार्थस्वरूपस्य किन्तु नाथाशिष
आशासानानामेतदभिसंराधनमात्रं भवितुमर्हति ॥ **8** ॥

तद्यथा बालिशानां स्वयमात्मनः श्रेयः परमविदुषां
परमपरमपुरुषप्रकर्षकरुणया स्वमहिमानं
चापवर्गाख्यमुपकल्पयिष्यन् स्वयं नापचित
एवेतरवदिहोपलक्षितः ॥ **9** ॥

अथायमेव वरो ह्यर्हत्तम यर्हि बर्हिषि
राजर्षेर्वरदर्षभो भवान्निजपुरुषेक्षणविषय
आसीत् ॥ **10** ॥

असङ्गनिशितज्ञानानलविधूताशेषमलानां
भवत्स्वभावानामात्मारामाणां मुनीनामनवरत -
परिगुणितगुणगणपरममङ्गलायनगुणगण -
कथनोऽसि ॥ **11** ॥

अथ कथञ्चित्स्खलनक्षुत्पतनजृम्भणदुरवस्थानादिषु
विवशानां नः स्मरणाय ज्वरमरणदशायामपि सकल -
कश्मलनिरसनानि तव गुणकृतनामधेयानि
वचनगोचराणि भवन्तु ॥ **12** ॥

किञ्चायं राजर्षिरपत्यकामः प्रजां भवादृशीमाशासान
ईश्वरमाशिषां स्वर्गापवर्गयोरपि भवन्तमुपधावति
प्रजायामर्थप्रत्ययो धनदमिवाधनः फलीकरणम् ॥ **13** ॥

को वा इह तेऽपराजितोऽपराजितया मायया -
नवसितपदव्यानावृतमतिर्विषयविषरयानावृत -
प्रकृतिरनुपासितमहच्चरणः ॥ **14** ॥

यदु ह वाव तव पुनरदभ्रकर्तरिह समाहूत -
स्तत्रार्थधियां मन्दानां नस्तद्यद्देवहेलनं
देवदेवार्हसि साम्येन सर्वान् प्रतिवोढुम -
विदुषाम् ॥ **15** ॥

श्रीशुक उवाच
इति निगदेनाभिष्टूयमानो भगवाननिमिषर्षभो
वर्षधराभिवादिताभिवन्दितचरणः सदयमिदमाह ॥ **16** ॥

श्रीभगवानुवाच
अहो बताहमृषयो भवद्भिरवितथगीर्भिर्वरमसुलभ -
मभियाचितो यदमुष्यात्मजो मया सदृशो भूयादिति

ममाहमेवाभिरूपः कैवल्यादथापि ब्रह्मवादो न मृषा
भवितुमर्हति ममैव हि मुखं यद् द्विजदेवकुलम् ॥ **17** ॥

तत आग्नीध्रीयेऽंशकलयावतरिष्याम्यात्मतुल्य -
मनुपलभमानः ॥ **18** ॥

श्रीशुक उवाच
इति निशामयन्त्या मेरुदेव्याः पतिमभिधाया -
न्तर्दधे भगवान् ॥ **19** ॥

बर्हिषि तस्मिन्नेव विष्णुदत्त भगवान् परमर्षिभिः
प्रसादितो नाभेः प्रियचिकीर्षया तदवरोधायने
मेरुदेव्यां धर्मान् दर्शयितुकामो वातरशनानां
श्रमणानामृषीणामूर्ध्वमन्थिनां शुक्लया
तनुवावततार ॥ **20** ॥

॥ इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
पञ्चमस्कन्धे नाभिचरिते ऋषभावतारो नाम तृतीयोऽध्यायः ॥